# Bharata Gauravam 2

# ભારતગૌરવમ્ ૨

## Document Information

Text title : Bharata Gauravam 2

File name : bhAratagauravam2.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : mahAdevashAstri

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Bharata Rashtra Geetam, Sarvabhaum Sanskrit Prachar Karyalay Pustakamala 38, Vasudev Dvivedi Shastri (Ed.)

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# Bharata Gauravam 2

# ભારતગૌરવમ્ ૨

(સ્રગ્ધરા)
આલોલોલ્લોલમાલા-કલકલકલિતામ્ભોધિકૂલાલ્લલામાદ્
 યાવન્નીહારભૂમીધર - ધવલશિલા - લગ્ન - ભૂ સંવિભાગાન્ ।
સીમાન્તાદા ચ વઙ્ગોપસરિદધિપતિં યાવદસ્ત્યેષ સસ્યૈઃ
 પત્રશ્યામૈર્દ્રુમાગ્રૈર્વલયિતવસુધો ભારતં નામ દેશઃ ॥

વઙ્ગૈઃ સઙ્ગીતકીર્તિઃ કલિતકલકલશ્ચોત્કલૈરાન્ધ્રબન્ધુ-
 ર્મદ્રૈરુન્નિદ્રમુદ્રો જવજનિતજયોદ્દુર્જરઃ સિન્ધુબિન્દુઃ ।
પઞ્ચાપૈરઞ્ચિતશ્રીર્મધુમધુરધુરો - મધ્યયુક્તૈર્વિહારૈ -
 રાર્યાવર્તાભિધાનો જયતિ જનપદો માનિનાં જન્મભૂમિઃ ॥

દેવૈરાપ્યાયિતશ્રીરપિ સુરઝરિણી - નિર્ઝરામ્ભઃ - પુનીતો,
 નીતઃ શિક્ષાં બૃહત્યાઃ પતિભિરનુદિનં કીર્તિતો લેખવૃક્ષૈઃ ।
મન્દારૈઃ પારિજાતાદિભિરથ સહરિઃ પુણ્યભોગ્યઃ સુધાચ્છો,
 ગન્ધર્વૈર્ગીયમાનો વિલસતિ સકલો ભારતસ્વર્ગલોકઃ ॥

ગુઞ્જદ્-ભૃઙ્ગાલિ-ગીતૈઃ શ્રુતિસુખમધુરૈઃ કૂજદાલોહિતાક્ષૈ-
 શ્ચૂતાસ્વાદાતિરિક્તસ્વરમુખર-પિકૈર્માધદામોદવાહૈઃ ।
પુષ્પાણાં પાવમાનઃ પ્રકૃતિ-વરવધૂ-નૂતનાક્રીડમુગ્ધં
 દિગ્ધં શોભાભિરામં કુશલકૃતિકલોલ્લાસિતં ભારતં નઃ ॥

ચારિત્ર્યાણાં નિધાનં મનુજતનુભૃતાં સંવિધાનં શુચીનાં
 મર્યાદાનાં નિધાનં વિમલમતિમતાં યોગિનાં સન્નિધાનમ્ ।
આધાનં દિવ્યભાસાં પ્રકૃતિવિલસિતાગારમેકં પ્રધાનં
 રાષ્ટ્ર ન્યાયાવધાનં પ્રતિપદમયતે ભારતોચ્ચાભિધાનમ્ ॥

વિશ્વેશઃ સર્વશક્તિર્ગિરિવરતનયા-સાહચર્યાર્ચિતશ્રીઃ
 સાન્દ્રાનન્દામૃતામ્ભોનિધિરમરસરિદ્વીચિવાચાલ મૌલિઃ ।
સ્વાતન્ત્ર્યોલ્લાસલોલાં વિલસિતવિભવાં સર્વશોભાભિરામાં

ભવ્યાં ભવ્યૈકભાવાં ભરત ભુવમિમાં સર્વદા સમ્બિભર્તુ ॥

-કવિતાર્કિકચક્રવર્તિશ્રીમહાદેવશાસ્ત્રિણામ્,

વારાણસેયાનામ્ ।

Proofread by Mandar Mali

*Bharata Gauravam 2*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*